**CBSE Class 12 संस्कृत कोर**
**एनसीईआरटी प्रश्न-उत्तर**
**पाठ - 7 दारिद्र्ये दुर्लभं सत्त्वम्**

---

## अनुप्रयोगः

**1. एतेषां पदानाम् उच्चारणं अभिनयपूर्वकं कुरु-**

प्रविश्य, परिक्रम्यावलोक्य, चिरंजीव, सरोषम्, दीर्घ निःश्वस्य, निष्क्रान्तः

**उत्तरम्-**

- **प्रविश्य** = मंच पर प्रवेश करने का अभिनय करें।
- **परिक्रम्यावलोक्य** = मंच पर चारों ओर घूमने तथा किसी को देखने का अभिनय करें।
- **चिरंजीव** = मंच पर किसी को दीर्घायु का आशीर्वाद दें।
- **सरोषम्** = क्रोधपूर्वक वार्तालाप का अभिनय करें।
- **दीर्घ निःश्वस्य** = गहरी साँस लेने का अभिनय करें।
- **निष्क्रान्तः** = मंच से बाहर जाने का अभिनय करें।

---

**2. समानार्थकशब्दानाम् उचितं मेलनं कुरु-**

| 'अ' | 'आ' |
|---|---|
| (i) पुष्करम् | (क) नयने |
| (ii) प्रत्यूषे | (ख) दिवानिशम् |
| (iii) अक्षिणी | (ग) मित्रम् |
| (iv) अहोरात्रम् | (घ) कमलम् |
| (v) वयस्यः | (ङ) प्रातःकाले |

उत्तरम्-

| 'अ' | 'आ' |
|---|---|
| (i) पुष्करम् | (घ) कमलम् |
| (ii) प्रत्यूषे | (ङ) प्रातःकाले |

| | |
|---|---|
| (iii) अक्षिणी | (क) नयने |
| (iv) अहोरात्रम् | (ख) दिवानिशम् |
| (v) वयस्यः | (ग) मित्रम् |

**3. विशेषणानाम् विशेष्यैः सह मेलनं कुरू-**

| 'क' | 'ख' |
|---|---|
| (i) मनस्विनः | (क) अशनम् |
| (ii) शोभनानाम् | (ख) जनम् |
| (iii) सम्पन्नम् | (ग) भार्या |
| (vi) दरिद्रं | (घ) पुरुषस्य |
| (v) विभवानुवशा | (ङ) भोजनानाम् |

**उत्तरम्-**

**ध्यातव्या - विशेषण-विशेष्य शब्देषु समान विभक्ति वचनं च स्तः इति ध्यातव्यः**

| 'क' | 'ख' |
|---|---|
| (i) मनस्विनः | (घ) पुरुषस्य |
| (ii) शोभनानाम् | (ङ) भोजनानाम् |
| (iii) सम्पन्नम् | (क) अशनम् |
| (vi) दरिद्रं | (ख) जनम् |
| (v) विभवानुवशा | (ग) भार्या |

**4. अधोलिखितशब्देषु सन्धिम् कुरुत परिवर्तनं च लिखत-**

| | | | | | |
|---|---|---|---|---|---|
| (क) अस्ति | + | अस्माकम् | = | .................. | इ → य् |
| (ख) मम | + | उपवासः | = | .................. | .................. |
| (ग) मया | + | अपि | = | .................. | .................. |
| (घ) आगतः | + | असि | = | .................. | .................. |

| | | | | | |
|---|---|---|---|---|---|
| (ङ) तण्डुलाः | + | च | = | .................. | .................. |
| (च) गेहात् | + | निष्क्रान्तस्य | = | .................. | .................. |

**उत्तरम्-**

| | | | | | |
|---|---|---|---|---|---|
| (क) अस्ति | + | अस्माकम् | = | अस्त्यस्माकम् | इ → य् |
| (ख) मम | + | उपवासः | = | ममोपवासः | अ + उ → ओ |
| (ग) मया | + | अपि | = | मयाऽपि | आ + अ → आ |
| (घ) आगतः | + | असि | = | आगतोऽसि | अः → ओ, परवर्ती 'अ' लोप |
| (ङ) तण्डुलाः | + | च | = | तण्डुलाश्च | : → श् |
| (च) गेहात् | + | निष्क्रान्तस्य | = | गेहान्निष्क्रान्तस्य | त् → न् |

**5. निम्नलिखित विग्रहशब्दानाम् समस्तपदानि पाठस्य अनुसारं लिखत-**

| | | |
|---|---|---|
| (i) पुष्करस्य पत्रे पतितौ जलस्य बिन्दू इव | = | .................. |
| (ii) दीपस्य दर्शनम् | = | .................. |
| (iii) ज्योत्स्नायाः परिक्षयः | = | .................. |
| (iv) गृहस्य दैवतानि | = | .................. |
| (v) रोषेण सह | = | .................. |
| (vi) नष्टा धनश्रीः यस्य एवं भूतस्य | = | .................. |
| (vii) अहः च रात्रिः च तयोः समाहारः | = | .................. |

**उत्तरम्-**

| | | |
|---|---|---|
| (i) पुष्करस्य पत्रे पतितौ जलस्य बिन्दू इव | = | पुष्करपत्रपतितजलबिन्दू इव |
| (ii) दीपस्य दर्शनम् | = | दीपदर्शनम् |
| (iii) ज्योत्स्नायाः परिक्षयः | = | ज्योत्स्नापरिक्षयः |
| (iv) गृहस्य दैवतानि | = | गृहदैवतानि |
| (v) रोषेण सह | = | सरोषम् |

| | | |
|---|---|---|
| (vi) नष्टा धनश्रीः यस्य एवं भूतस्य | = | नष्टधनश्रियस्य |
| (vii) अहः च रात्रिः च तयोः समाहारः | = | अहोरात्रम् |

**6. प्रकृति-प्रत्ययं संयोज्य वाक्यपूर्तिं कुरु-**

i. **आर्य! दिष्ट्या खलु (आ + गम् + क्त) .................. असि।**
ii. **सम्पन्नम् अशनम् (अश् + तव्यत्) ..................।**
iii. **भवतः (रम् + अनीयर्) .................. दरिद्रभावः।**
iv. **(अर्च् + शतृ) .................. चारुदत्तः गृहदैवतानि इत एव आगच्छति।**
v. **सुखात् परं (दरिद्र + तल्) .................. दुःखदा भवति।**
vi. **अहं गृहं (प्र + विश् + ल्यप्) .................. जानामि भोज्य-व्यवस्थाम्।**

**उत्तरम्-**

i. आर्य! दिष्ट्या खलु **आगतः** असि।
ii. सम्पन्नम् अशनम् **अशितव्यम्**।
iii. भवतः **रमणीयः** दरिद्रभावः।
iv. **अर्चयन्** चारुदत्तः गृहदैवतानि इत एव आगच्छति।
v. खात् परं **दरिद्रता** दुःखदा भवति।
vi. अहं गृहं **प्रविश्य** जानामि भोज्य-व्यवस्थाम्।

**7. अधोलिखितेषु वाक्येषु कर्तानुसारम् क्रियाम् योजितत्वा लिखत -**

i. **अहम् त्वाम् निमन्त्रयितुम् ..................।(इच्छसि/इच्छामि)**
ii. **मैत्रेयः इत एव ..................।( आगच्छति/आगच्छन्ति)**
iii. **भवान् क्षणमात्रं ..................। (प्रतिपालय/प्रतिपालयतु)**
iv. **धनानि श्रमेण पुनः ..................।(भवन्ति/भवति)**
v. **मित्र! अहं किमर्थं सन्तापं ..................।(करिष्यसे/करिष्ये)**

**उत्तरम्-**

i. अहम् त्वाम् निमन्त्रयितुम् **इच्छामि**।
ii. मैत्रेयः इत एव **आगच्छति**।
iii. भवान् क्षणमात्रं **प्रतिपालयतु**।
iv. धनानि श्रमेण पुनः **भवन्ति**।

v. मित्र! अहं किमर्थं सन्तापं <u>**करिष्ये**</u>।

---

**8. अधोलिखितेरेखाङ्कितपदेषु उपपदविभक्तिं तत्कारणं स्पष्टरूपे लिखत -**

1. **अहम् <u>पारावतैः</u> समम् यत्र-तत्र गच्छामि। ..................**
2. **अलं भवतः <u>संतापेन</u>। ..................**
3. **सत्त्वं च न परिभ्रष्टं यद् <u>दरिद्रेषु</u> दुर्लभम्। ..................**

**उत्तरम्-**

1. तृतीया विभक्तिः। 'समम्' के योग में तृतीया विभक्ति होती है।
2. तृतीया विभक्तिः। निषेध अर्थं में 'अलम्' के योग में तृतीया विभक्ति होती हैं।
3. सप्तमी विभक्तिः। 'अधिकरण कारक' में सप्तमी विभक्ति होती हैं। दुर्लभम् के योग में सप्तमी विभक्ति होती हैं।

---

**9. अत्र सर्वनामपदानि अव्ययपदानि मिश्रितरूपे सन्ति। एतेषां सर्वनामपदान् अव्ययपदान् च पृथक् कृत्वा लिखत -**
अद्य, प्रत्यूषे, मम, अलम्, तव, इदम्, इदानीम्, भवान्।

**उत्तरम्-**

1. **सर्वनामपदानि**- मम, तव इदम्, भवान्।
2. **अव्ययपदानि**- अद्य, प्रत्यूषे. अलम्, इदानीम्।

---

**10. प्रसङ्गानुसारं रेखाङ्कितपदानां शुद्धम् अर्थं चित्वा लिखत-**

| | |
|---|---|
| (क) <u>संविधा</u> विहिता न वेति गेहं गत्वा जानामि। | ..................................<br>(संविधानम्/भोजनम्/भोज्यव्यवस्था |
| (ख) <u>बहुलपक्ष</u>चन्द्रस्य ज्योत्स्नापरिक्षय इव रमणीयः दरिद्रभावः। | ..................................<br>(बहवः पक्षाः/कृष्णपक्षस्य/बहूनां पक्षे) |
| (ग) पापं कर्म च यत् <u>परैरपि</u> कृतं तत्तस्य सम्भाव्यते। | ..................................<br>(श्रेष्ठैः/शत्रुभिः/सामान्यजनैः) |
| (घ) <u>सत्त्वं</u> च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्। | ..................................<br>(मनः/सत्त्वोगुणः/बलम्) |

**उत्तरम्-**

(क) **संविधा** ⟵ शुद्धार्थः ⟶ भोज्य व्यवस्था
(ख) **बहुलपक्ष** ⟵ शुद्धार्थः ⟶ कृष्णपक्षस्य
(ग) **परैरपि** ⟵ शुद्धार्थः ⟶ शत्रुभिः (अपि)
(घ) **सत्त्वं** ⟵ शुद्धार्थः ⟶ मनः

---

**11. प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् लिखत-**

1. **सूत्रधारः रङ्गमञ्चे कदा प्रविशति? ..........................**
2. **सूत्रधारस्य अक्षिणी केन कारणेन चञ्चलायेते? ..........................**
3. **विदूषकस्य किं नाम आसीत्? ..........................**
4. **चारुदत्तः कीदृशस्य पुरुषस्य दारिद्र्यं दारुणातरं मन्यते स्म? ..........................**
5. **चारुदत्तस्य दरिद्रभावः किमिव रमणीयो भवति?..........................**
6. **सुखं कदा शोभते? ..........................**
7. **दरिद्रेषु किम् दुर्लभं मन्यते? ..........................**
8. **अयं पाठः कस्माद् ग्रन्थाद् उद्धृतः कश्च तस्य लेखकः? ..........................**

**उत्तरम्-**

1. सूत्रधारः रङ्गमञ्चे नान्द्यन्ते प्रविशति।
2. सूत्रधारस्य अक्षिणी बुभुक्षया चञ्चलायेते।
3. विदूषकस्य नाम मैत्रेयः आसीत्।
4. चारुदत्तः गुणरसज्ञस्य पुरुषस्य दारिद्र्यं दारुणतरं मन्यते स्म।
5. चारुदत्तस्य दरिद्रभावः बहुलपक्षचन्द्रस्य ज्योत्स्नापरिक्षय इव रमणीयो भवति।
6. सुख दुःखानि अनुभूय हि शोभते।
7. दरिद्रेषु विभवानुवशा भार्या, समदुःखसुखं मित्रं, सत्वं न परिभ्रष्टं च दुर्लभं मन्यन्ते।
8. अयं पाठः 'चारुदत्तम्' नाटकग्रन्थात् उद्धृतः, महाकविः भासश्च तस्य लेखकः।

---

**12. अत्र कः कम् प्रति कथयति?**

| | **'कः'** | **'कम् प्रति'** |
|---|---|---|
| (क) किम् अस्त्यस्माकं गेहे कोऽपि प्रातराशः? | .......................... | .......................... |
| (ख) मुहूर्तकं प्रतिपालयतु आर्यः। | .......................... | .......................... |
| (ग) आर्य! निमन्त्रितोऽसि। | .......................... | .......................... |

| | | |
|---|---|---|
| (घ) न खल्वहं नष्टां श्रियम् अनुशोचामि। | ......................... | ......................... |
| (ङ) अलं भवतः संतापेन। | ......................... | ......................... |

**उत्तरम्-**

| 'कः' | 'कम् प्रति' |
|---|---|
| (क) सूत्रधारः | नटीम् |
| (ख) नटी | सूत्रधारम् |
| (ग) सूत्रधारः | मैत्रेयं |
| (घ) चारुदत्तः | विदूषकम् |
| (ङ) विदूषकः | चारुदत्तम् |

**13. अत्र किंचित् कथनानि भावपूर्णानि सन्ति। मञ्जूषायाः सहायतया उचितभावं विचित्वा सर्वेषां कथनानां समक्षे लिखत-**

| | |
|---|---|
| (क) आर्य! दिष्ट्या खलु आगतोऽसि। | ......................... |
| (ख) यदि आर्यस्यानुग्रहः स्यात् तर्हि कञ्चिद् योग्यं जन निमंत्रयितुम् इच्छामि। | ......................... |
| (ग) भोः दारिद्र्यं नाम मनस्विनः पुरुषस्य सोच्छ्वासं मरणम्। | ......................... |
| (घ) गुणरसज्ञस्य तु पुरुषस्य व्यसनं दारुणतरं मां प्रतिभाति। | ......................... |
| (ङ) चिरं जीव, एवं शोभनानां भोजनानां दात्री भव। | ......................... |
| (च) आर्य! किमेतत् सर्वम् अस्माकं गेहेऽस्ति! | ......................... |
| (छ) वयस्य किमर्थं सन्ताप करिष्ये। | ......................... |
| (ज) अलम् इदानीं भवान् अतिमात्रं सन्तुष्टुम्। | ......................... |
| (निवेदनम्, हर्षः, दया, शोकः, आशीर्वादः, सन्तोषः, सान्त्वना, आश्चर्यम्) | |

**उत्तरम्-**

| | |
|---|---|
| (क) आर्य! दिष्ट्या खलु आगतोऽसि। | हर्षः |
| (ख) यदि आर्यस्यानुग्रहः स्यात् तर्हि कञ्चिद् योग्यं जन निमंत्रयितुम् इच्छामि। | निवेदनम् |
| (ग) भोः दारिद्र्यं नाम मनस्विनः पुरुषस्य सोच्छ्वासं मरणम्। | शोकः |

| | |
|---|---|
| (घ) गुणरसज्ञस्य तु पुरुषस्य व्यसनं दारुणतरं मां प्रतिभाति। | दया |
| (ङ) चिरं जीव, एवं शोभनानां भोजनानां दात्री भव। | आशीर्वादः |
| (च) आर्य! किमेतत् सर्वम् अस्माकं गेहेऽस्ति! | आश्चर्यम् |
| (छ) वयस्य किमर्थं सन्ताप करिष्ये। | सान्त्वना |
| (ज) अलम् इदानीं भवान् अतिमात्रं सन्तुष्टुम्। | सन्तोषः |
| (निवेदनम्, हर्षः, दया, शोकः, आशीर्वादः, सन्तोषः, सान्त्वना, आश्चर्यम्) | |

**14. अत्र प्रत्येकवाक्यांशानां त्रयः भावाः सन्ति। उचितं भावार्थं (✔) चिह्नेन चिह्नितं कुरुत-**

1. **बहुलपक्षच्चन्द्रस्य ज्योत्स्नापरिक्षय इव भवतः एव रमणीयोऽयं दरिद्रभावः।**
   i. यथा कृष्णपक्षे चन्द्रः सततं प्रकाशहीनः भवति तथैव शनैः शनैः चारुदत्तः धनहीनो जातः।
   ii. यथा कृष्णपक्षे क्षयं प्राप्ता चन्द्रकला शुक्लपक्षे प्रतिपत्तिथौ शुभा भवति, तथैव दानेन धनविहीनस्य चारुदत्तस्य दरिद्रता शोभते एव।
   iii. क्षीणा चन्द्रकलेव चारुदत्तस्य दरिद्रता शोभते।
2. **गुणरसज्ञस्य तु पुरुषस्य व्यसनं दारुणतरं मां प्रतिभाति।**
   i. गुणवतः कारुण्यादिभावयुक्तस्य सहृदयजनस्य दारिद्रयम् असह्यमेव चारुदत्तस्य कृते।
   ii. यः गुणवान् रसज्ञः च भवति तस्य दरिद्रता घोरा भवति।
   iii. गुणरसज्ञः पुरुषः तु विपत्तिं न चिन्तयति।
3. **सत्त्वं च न परिभ्रष्टं यद् दरिद्रेषु दुर्लभम्।**
   i. दरिद्रावस्थायाम् मनुष्यः भ्रष्टो भवति।
   ii. दरिद्रेषु कोऽपि मानवः भ्रष्टो भवति।
   iii. दरिद्रावस्थायां यस्य मनः नैव भ्रष्टं जातम्, तत्तु दुर्लभमेव।

**उत्तरम्-**

1. ii. **उचित भावार्थः**- क्षीणा चन्द्रकलेव चारुदत्तस्य दरिद्रता शोभते। **(✔)**
2. i. **उचितः भावार्थः**- गुणवतः कारुण्यादिभावयुक्तस्य सहृदयजनस्य दारिद्रयम् असह्यमेव चारुदत्तस्य कृते। **(✔)**
3. iii. **उचितः भावार्थः**- दरिद्रावस्थायां यस्य मनः नैव भ्रष्टं जातम्, तत्तु दुर्लभमेव। **(✔)**